**International Journal of Multidisciplinary Education and Research**
**ISSN: 2455-4588; Impact Factor: RJIF 5.12**
**www.educationjournal.in**
**Volume 1; Issue 7; September 2016; Page No. 48-49**

# कालिदासस्य यथा काव्ये तथा नाट्ये सरूपा प्रभविष्णुता

**डॉ0 छगन लाल शर्मा**
राष्ट्रीय संस्कृत विद्यापीठ तिरूपती, आंध्र प्रदेश, भारत।

## प्रस्तावना

को न जानाति चित्तानन्दजनिका हृदयाह्लादकारिणी सहृदयहृदय–हारिणी पराशैलीलसिता कामिनीव हावभावकटाक्षभुजाक्षेपप्रभृतिभिः समानसेव्यतया रसास्वादनसुखपरम्परायाः जनयित्री कालिदासस्य कवितेति।

सेयं कविता 'दृश्यश्रव्यत्वभेदेन' द्विधेति समालोचकैः समुद्भाविता। तस्यामेव धारायां प्रवाहमानेषु आप्राचीननवीनकविषु कविकुलगुरूः कालिदासः कुमारसम्भव–रघुवंश–ऋतुसंहार–मेघदूताख्यानि चत्वारि श्रव्यकाव्यानि, अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम्, विक्रमोर्व–शीयम् इति त्रीणि नाटकानि विरच्य विजयतेतराम्। तस्य महानुभावस्य नवनोन्मेषशालिनी प्रज्ञा प्रतिभा उभयत्र दृश्यश्रव्यकाव्येषु समानरूपेण द्रष्टुं शक्यत इति हेतोः जोधुष्यते समालोचकैः –

> **"यथा काव्ये तथा नाट्ये सरूपा प्रभविष्णुता।**
> **केवलं कालिदासस्य साहित्ये लक्ष्यते ध्रुवम्।।**

सोऽयं कालिदासः छन्दः–अलङ्कार–रस–प्रकृतिसौन्दर्य–विषयवस्तु–गुण– रीतीत्यादीनां प्रयोगोऽपरेभ्यः कविभ्यः विशिष्टायते श्रेष्ठायते इति नास्ति कस्यापि काऽपि संशीतिः। तद्रचित–काव्य–नाटकानां विभिन्नोदहराणानि प्रस्तूय कवेरस्य उभयत्र काव्यनाटकयोः प्रभविशुतायाः समरूपता, अपरेभ्यः कविभ्यः श्रेष्ठत्वञ्च प्रतिपाद्यते।

तत्र आद्यं छन्दसां प्रयोगे

महाकविरयं सर्वदा प्रायशः स्वभावचित्रणप्रसङ्गे अनुष्टभ् छन्दसः प्रयोगमेव चकार। तद्यथा–शाकुन्तले –

> **मानुषीषु कथं वा स्यादस्य रूपस्य संभवः।**
> **न प्रभातरलं ज्योतिरूदेति वसुधातलात्।।**

तथैव कुमारसम्भवस्य द्वितीयसर्गे –

> **"तस्मिन्विप्रकृता काले तारकेण दिवौकसः।**
> **तुरासाहं पुरोधाय धामं स्वायम्भुवं ययुः।।**

अनया रीत्या रघुवंशे प्रथमसर्गे –

> **"वागर्थाविव सम्पृक्तौ वागर्थः प्रतिपत्तये।**
> **जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।**

अस्य महाकवेः गुरूगम्भीरवर्णनास्थलेषु इन्द्रवज्रा उपेन्द्रवज्रा–उपजातीनां प्रयोगः सर्वदा सर्वथा च स्पृहणीयः। सोऽयं प्रयोगः कुमारसम्भवस्य प्रथमसर्गे उमायाः वर्णनप्रसङ्गे, रघुवंशे इन्दुमती–स्वयंवरप्रस्तावकाले, अभिज्ञानशाकुन्तले शकुन्तलायाः गमनसमये मालविकाग्निमित्रस्य प्रथमाङ्के च प्रयुक्तः अवलोक्यते। तथैव वंसस्थ–वसंततिलका मालिनीत्यादि वृत्तानामपि प्रयोगः सर्वत्र द्रष्टुं शक्यते। विरहविधुरपक्षस्य यक्षबालायाश्च वविरहम्लानम् अङ्कनाय मेघदूतस्य दीर्घायमानमन्दाक्रान्ताच्छन्दः यथोपयोगि तथैव पतिवियोगिनीकामवधोः वियोगिनीवृत्तेन हृदयविदारकं कारूण्यमय–क्रन्दनं करूण–रसं सम्यक्प्रतिपादयति। उभयत्रापि छन्दसोः (छन्दसाम्) औचित्यपूर्णः विन्यासः कवेः सरूपप्रभविष्णुतां व्यनक्ति।

न केवलं छन्दसाम् अपितु उपमाद्यलङ्काराणां, पात्रचरित्राणां, प्रकृति–चित्रणानां, माधुर्यगुणस्य वैदर्भीरीतेः नवरसानां प्रतिपादन–कालेऽपि च तस्य नवनवोन्मेषशालिनी प्रज्ञा समरूपताम् अवलम्बते। श्रृङ्गारहास्यकरूणरौद्रवीरभयानकादिरसविषये तस्य लेखनीधारा स्वतस्स्फूर्ततया सौचित्या प्रवहति सर्वत्र सर्वथा सर्वदा च।

'उपमा कालिदासस्य' इति श्रुतिसौरभं कवेरस्य चतुर्ष श्रव्यकाव्येषु यथा सुगन्धायितं भवति तथा त्रिषु नाटकेष्वपि। यथाऽस्य स्पष्टोदाहरणं रघुवंशे –

'सन्चारिणी दीपशिखेव रात्रिः' 'दिनक्षपामध्यगतेव सन्ध्या' 'वार्गर्थाविव सम्पृक्तौ पार्वती परमेश्वरौ' तथैव तेषामाविर्भूद्ब्रहमा प्रातर्दीधितमानिव। एवमेव शाकुन्तलेऽपि – अधरः किसलयरागः, अनाघ्रातं पुष्पम्, तद्वत्–विक्रमोर्वशीये –

> **'अधिरोहति शैलाग्रं तड़िद्वानिव तोयदः' तथैव ऋतुसंहारे –**
> **"प्राप्ता शरन्नववधूरिव रम्यरूपा' इति। एवमेव**

> **मालविकाग्निमित्रेऽपि –**
> **'पङ्कच्छिदः फलस्येव निकषेवाविलं पयः'** (3/7)
> **अपि च मेघदूतेऽपि –**
> **'मुक्ताजालग्रथितमलकं कामिनीवाभिवृन्दम्'** (1/63)

एवम् अर्थान्तरन्यासविन्यासे कविः सिद्धहस्तः आसीत्। अतः समालोचकैः उच्यते – 'अर्थान्तरन्यासविन्यासे कालिदासो विशिष्यते'। रसप्रस्तावनायाम् अभिज्ञानशाकुन्तले दुष्यन्तेन शकुन्तलात्यागः, शिवेन कामदहनावसरे इतिविलापः, रघुवंशे अजविलापः, मेघदूते मालाविकाग्निमित्रे विक्रोर्वशीये च नायकानां विरहवेदना कालिदासस्य कवितासमरूपतां द्योतयन्ति। श्रृङ्गारादिप्रसङ्गेष्वपि।

प्रक्रतिचित्रणप्रसङ्गे मृगमयूरमधुकरमरालमीनानां वर्णनं यथा अस्य काव्येषु दृश्यते तथैव नाटकेष्वपि।

कीचक–कुङ्कुम–काश–किंशुक–कदली–कन्दली–कमलादिवृक्षाणाम् उभयत्रापि औचित्यपूर्णविन्यासः कवेः सरूपप्रभविष्णुतायाः परिचयं प्रददाति।

ग्रीष्मर्तोः वर्णनं यथा अभिज्ञानशाकुन्तले –

> **सुभगसलिलावगाहाः पाटलसंसर्गसुरभिवनवाताः।**
> **प्रच्छायसुलभनिद्राः दिवसाः परिणामरमणीयाः।।**
> (शाकुन्तलप्रस्तावना)

इति श्लोकेन ज्ञायते। तथैव रघुवंशे षोड़शेऽध्याये दशभिः श्लोकैः ग्रीष्मर्तोः रमणीयं वर्णनं कृतं कविना।

ऋतुसंहारेऽपि –

> **'प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः, सदावगाहक्षमवारिसञ्चयः।'**
> **दिनान्तरत्योऽभ्युपशान्तमन्मथो, निगाधकालः समुपागतःप्रिये।।**

इत्यादिश्लोकैः ग्रीष्मर्तोःवर्णनं कृतमस्ति।

वैदर्भीरीतेः माधुर्यगुणस्य च प्राचुर्यं सर्वेषु काव्येषु नाटकेषु च समानरूपेण द्रष्टुं शक्यते। यथा शाकुन्तले –

> **गाहन्तां महिशो निपानसलिलं श्रृङ्गैर्मुहुस्ताड़ितम्,**

**छायाबद्धकदम्बकमृगकुलं रोमन्थमभ्यस्यतु।**
**विश्रब्धैः क्रियतां वराहपतिभिः मुस्ताक्षतिः पल्वले;**
**विश्रामं लभतामिदञ्च शिथिलज्याबन्धमस्मद्धनुः।।**

इति श्लोके वैदर्भीरीतिर्दृश्यते तथा –

**मालविकाग्निमित्रेऽपि –**

**नितम्बबिम्बैः सदुकूलमेखलैः स्तनैः सहाराभरणैः सचन्दनैः।**
**शिरोरुहैः स्नानकषायवासितैः, स्त्रियो निदाघं शमयन्ति कामिनाम्।।** (1/8)

रघुवंशेऽपि –

**नृत्यं मयूराः कुसुमानि भृङ्गाः, दर्भानुपात्तान् विजहुहरिण्यः।**
**तस्याः प्रपन्ने समदुःखभावम्–अत्यन्तमासीद् रुदितं वनेऽपि**
(1/4/6)

अतः एव समालोचकाः सङ्गिरन्ते – ''वैदर्भीरीतिसन्दर्भे कालिदासो विशिष्यते'' इति केचन कवयः नाटकादिलेखने कुशलाः यथा भासादयः केचन तु काव्यलेखने निपुणाः यथा भारविमाघादयः किन्तु उभयत्र सरूपा गतिस्तु अस्यैव महाकवेः। अत एव उच्यते –

**''पुराकवीनां गणनाप्रसङ्गे, कनिष्ठिकाधिष्ठितकालिदासः।**
**अद्यापि तत्तुल्यकवेरभावात्, अनामिका सार्थवती बभूव।।**

भासोऽपि कथयति –

**निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु।**
**प्रीतिर्मधुरसान्द्रासु मन्जरीष्विव जायते।। इतिशम्।।**

**संदर्भग्रन्थसूची**


| | ग्रन्थ नाम | लेखक/सम्पादक | प्रकाशन |
|---|---|---|---|
| 1. | अभिज्ञानशाकुन्तलम् | कालिदासः | चौखम्भाप्रकाशन वाराणसी |
| 2. | काव्यप्रकाशः | मम्मटाचार्यः | चौखम्भाप्रकाशन वाराणसी |
| 3. | कालिदासग्रन्थावली | पं. सीताराम चतुर्वेदी | उ.प्र. संस्कृत संस्थान |
| 4. | कालिदासग्रन्थावली | रामचन्द्र मिश्रः | चौखम्भासुरभारती प्रकाशन, वाराणसी |
| 5. | कुमारसम्भवम् | कालिदासः | चौखम्भाप्रकाशन वाराणसी |
| 6. | नीतिशतकम् | भर्तृहरिः | चौखम्भाविद्याभवन, वाराणसी |
| 7. | मेघदूतम् | कालिदासः | चौखम्भाप्रकाशन वाराणसी |
| 8. | रघुवंशमहाकाव्यम् | कालिदासः | चौखम्भा–प्रकाशन कृष्णदास अकादमी वाराणसी |
| 9. | शिशुपालवधम् | माघः | चौखम्भा वाराणसी |
| 10. | संस्कतनिबन्धशतकम् | डॉ. कपिलदेव द्विवेदी | विश्वविद्यालय प्रकाशन वाराणसी |
| 11. | संस्कृत वाङ्मय का वृहद् इतिहास | बलदेव उपाध्याय | उ.प्र. संस्कृत संस्थान |
| 12. | संस्कृत साहित्य का इतिहास | आचार्य रामचन्द्र मिश्रः | चौखम्भामहाविद्याभवन वाराणसी |
| 13. | संस्कृत साहित्य का इतिहास | डॉ. उमाशंकर ऋषि | चौखम्भा विश्वभारतीय वाराणसी |
| 14. | संस्कृत प्रभा | डॉ. कपिलदेव द्विवेदी | उ.प्र. संस्कृत संस्थान |